[५६] नभोऽङ्गिरोमनुषां वत्युपसङ्ख्यानम् । (म. भा. १.३२०)

नभ इव नभस्वत् । अङ्गिरा इव अङ्गिरस्वत् । मनुरिव मनुष्वत् ।

[५७] वृषण्वस्वश्वयोः । (म. भा. १.३२०)

वृषन् इत्ये[1]तत् वस्वश्वयोः परतो भसञ्ज्ञं भवति छन्दसि विषये। वृषण्वसुः (ऋ. १.१११.१)। 'वृषणश्वस्य मेनासीत्' (मै. २.५.५) ।

भप्रदेशाः—'भस्य' (६.४.१२९/२३३) इत्येवमादयः ॥

तसौ मत्वर्थे । (१९/१८९६)

भम् इति वर्तते । तकारान्तं सकारान्तं[2] शब्दरूपं मत्वर्थे प्रत्यये परतो भसञ्ज्ञं भवति । उदश्वित्वान् घोषः । विद्युत्वान् बलाहकः । [3]सकारान्तम्—[4]पयस्वी । यशस्वी । तसौ इति किम् ? तक्षवान् ग्रामः ॥

अयस्मयादीनि छन्दसि । (२०/३३९०)

अयस्मयादीनि शब्दरूपाणि छन्दसि विषये साधूनि भवन्ति । [5]भपदसञ्ज्ञाधिकारे विधानात् तेन मुखेन[6] साधुत्वमयस्मयादीनां विधीयते । अयस्मयं वर्म (पै.१.३७.५) । [7]अयस्मयानि पात्राणि (कौ.सू.८१.१८) । क्वचिदुभयमपि भवति । स सुष्टुभा स ऋक्वता गणेन (ऋ. ४.५०.५) । पदत्वात् कुत्वं, भत्वाज् जश्त्वं न भवति । छन्दसि इति किम् ? अयोमयं [8]वर्म । [9]आकृतिगणोऽयम् ॥

बहुषु बहुवचनम् । (२१/१८७)

ङ्याप् प्रातिपदिकात् [10]स्वादयः, लस्य तिबादयः इति [11]सामान्येन बहुवचनं विहितं, तस्यानेन [12]बहुत्वसङ्ख्या वाच्यत्वेन विधीयते । बहुषु बहुवचनं भवति । बहुत्वमस्य वाच्यं भवति [13]इति यावत् । कर्मादयोऽ[14]प्यपरे विभक्तीनाम[15]र्था वाच्याः । तदीये बहुत्वे बहुवचनम्[16] । [17]कर्मादिषु बहुषु बहुवचनम् इत्यर्थः । ब्राह्मणाः [18]पठन्ति । यत्र च सङ्ख्या [19]सम्भवति तत्रायमुपदेशः । अव्ययेभ्यस्तु निःसङ्ख्येभ्यः [20]सामान्यविहिताः स्वादयो विद्यन्त एव ॥

द्व्येकयोर्द्विवचनैकवचने । (२२/१८६)

द्वित्वैकयोरर्थयोः[21]द्विवचनैकवचने भवतः । एतदपि सामान्यविहितयोर्द्विवचनैकवचनयोरर्थाभिधानम्[22] । द्वित्वे [23]द्विवचनं भवति । एकत्वे एकवचनं [24]भवति । ब्राह्मणौ [25]पठतः । ब्राह्मणः [26]पठति ॥

---

1. एतत् नास्ति ब. क. 2. च इत्यधिकम् अ. क. फ. ह. 3. सान्तः ह, नास्ति अ. ड. 4. ओजस्वी अ, तरस्वी फ. 5. भसंज्ञाधिकारवचनात् अ. ड. ह. 6. एव इत्यधिकम् फ, मुखेन नास्ति ब. 7. अयस्मयीभिः फ. 8. चर्म ब. क. 9. नास्ति अ. ब. क. ड. ई. ह. 10. इति इत्यधिकम् ड. 11. सामान्येन नास्ति फ. 12. बहुत्वं वाच्यं ह. 13. इत्यर्थः स. ह. 14. अपि नास्ति अ. 15. अर्थाः नास्ति क. फ. ह. 16. भवति इत्यधिकम् ह. 17. कर्मादिगतबहुषु, क, बहुषु नास्ति ई. 18. पचन्ति अ. ड. ह. 19. अस्ति ह. 20. सामान्येन विहिताः फ. 21. विवक्षितयोः इत्यधिकम् अ. 22. भवति इत्यधिकम् अ. 23. द्विर्वचनं ब. 24. भवति नास्ति ह, भवतीति फ. 25. पचतः ब. 26. पचति ब. क. ह. ई.